# Semester -II, CC-3, Section-C, Important Prose romances and fables-

## Panchatantram

## पञ्चतन्त्रम्

संस्कृतसाहित्यस्य समृद्धासु शाखासु कथासाहित्यम् भवति अन्यतमम्। भारतवर्षे प्रायेण सर्वेषां मनुष्याणां कथाश्रवणे या प्रवृत्तिः दृश्यते तस्याः एव कथासाहित्यस्य आविर्भावः इति वक्तुं शक्यते। तस्मात् कथानाम् उल्लेखः वेदेषु, पुराणेषु, रामायणे, महाभारते तथा काव्येषु नाटकेषु च दृश्यते। परन्तु उपस्थापनस्य वैचित्र्यवशात् एका अपि कथा वैचित्र्यम् उपादेयत्वं च प्राप्नोति। कथाश्रवणेन मानवां चित्तेषु कश्चित् आनन्दः जायते। न केवलम् एतदेव, अपि तु कथासाहित्येन नीतिशिक्षा अपि प्राप्यते। वेदादिग्रन्थेभ्यः या नीतिशिक्षा लभ्यते सा शिक्षा सर्वदा न तु सुखग्राह्या भवति, विशेषतः बालकानां कृते। परन्तु कथासाहित्येभ्यः या शिक्षा लभ्यते तां शिक्षां तु सर्वे एव सादरं गृह्णति इति कथासाहित्यस्य वैशिष्ट्यम्। संस्कृतसाहित्येषु साहित्यरूपेण याः कथाः प्राप्यन्ते तेषु पञ्चतन्त्रम् इति कथासाहित्यम् संस्कृतगद्यसाहित्यस्य ऐतिह्यम् तथा अयं ग्रन्थोऽपि भवति कथासाहित्यस्य प्राचीनतमः ग्रन्थः।

‘छात्रसंसदि लब्धकीर्तिः’ इत्यनेन सम्मानेन मानितः विष्णशर्मा इति कश्चित् पण्डितप्रवरः महिलारोप्य-नगरस्य नृपतेः अमरशक्तेः विवेकविहीनेभ्यः त्रिभ्यः पुत्रेभ्यः विविधेषु विषयेषु शिक्षादानार्थम् एव इमम् ग्रन्थं रचितवान्। मूलीभूते अस्मिन् ग्रन्थे प्रसङ्गतः अन्याः अपि काश्चित् लघुकथाः सन्निविष्टाः – इत्येव वर्तते अस्य ग्रन्थस्य माहात्म्यम्। कथाः स्वयंसम्पन्नाः तथा वैचित्र्यपूर्णाः। प्रत्येकं कथायाः अन्तिमे भागे हृदयस्पर्शिना श्लोकेन नीतिवाक्यम्

अभिव्यक्तम्। अत्रेदं वक्तव्यं यत् विष्णुशर्मणः ऐतिहासिकः परिचयः कथमपि ज्ञातुं न शक्यते। परन्तु स कश्चित् कुशली कथाशिल्पी आसीत् इति निश्चप्रचमेव वक्तुं शक्यते।

अस्मिन् ग्रन्थे मुख्यतः पञ्च तन्त्राणि राजन्ते। मित्रलाभः, मित्रप्राप्तिः, काकोलूकीयम्, लब्धप्रणाशः, अपरीक्षितकारकम् चेति। ग्रन्थस्य आदावेव ग्रन्थकारेण लिखितम् –

"सकलार्थशास्त्रसारं जगति समालोक्य विष्णुशर्मेदम्।

तन्त्रैः पञ्चभिरेतच्चकार सुमनोहरं शास्त्रम्।।" इति।

मित्रलाभ इत्याख्ये प्रथमतन्त्रे द्वाविंशतिः मनोज्ञाः कथाः प्राप्यन्ते। दमनकः करटकश्चेति द्वौ शृगालौ, पिङ्गलकः इति कश्चित् सिंहः तथा सञ्जीवकः इत्याख्यः वृषभो हि अस्य तन्त्रस्य त्रीणि प्रधानानि चरितानि। कथाच्छलेन अत्र सामः भेदः इत्यादीनि राजनैतिकतत्त्वानि परिवेशितानि। अत्र किलोत्पाटनकारिणः वानरस्य दुर्दशा, काकबुद्ध्या कृष्णसर्पस्य प्राणनाशः, शशकस्य बुद्ध्या सिंहस्य प्राणनाशः, जीर्णधनस्य वणिजः कथाः चेति मनोज्ञाः विषयाः अत्र वर्णिताः। मित्रप्राप्तिः इति द्वितीये तन्त्रे कथाषट्कं प्राप्यते। तृतीयं तन्त्रम् काकोलूकीयम् सन्धिम् अवलम्ब्य तथा विग्रहम् आश्रित्य विरचितम्। तस्मात् तन्त्रमिदम् सन्धि-विग्रहः इति नाम्नापि परिचीयते। सन्धिः, विग्रहः, यानम्, आसनम्, संश्रयः, द्वैधीभावश्चेति षड्गुणेषु अवस्थानुसारम् यस्य कस्यापि ग्रहणम् भवति श्रेयस्करम्। प्राचीनभारतवर्षस्य राष्ट्रनीतिविषयकस्य इदम् एव तत्त्वम् अत्र लघुकथाचतुष्टयेन सम्यक् वर्णितम्। लब्धप्रणाशे षोडशकथाः प्राप्यन्ते, अपरीक्षितकारकमध्ये च पञ्चदशकथाः समुपलभ्यन्ते। नीतिविद्याम्, राजनीतिशास्त्रम् इत्यादि

विषयमाश्रित्य एव कथासाहित्यमिदम् विरचितम्। अत्रैव कथाकारस्य दाक्ष्यं यत्, मानवेतराणां पशूनां विहगानाम् आचारादिषु अपि मानवचरितस्य विविधाः विषयाः समुद्घाटिताः अभवन्। स्वयं ग्रन्थकारः तस्य ग्रन्थस्य विषये कथयति - 'एतत् पञ्चतन्त्रकं नाम नीतिसारं बालावबोधनार्थं भूतले प्रवृत्तम्' इति।

वाइवेलग्रन्थात् परम् अस्यां पृथिव्यां पञ्चतन्त्रम् एव सर्वाधिकतया प्रचारितः ग्रन्थः। प्रायेण पञ्चाशद्भाषाभिः अयं ग्रन्थः अनूदितः। ११९९ ईशवीयाब्दे श्वेताम्बरजैनः पूर्णभद्रः पञ्चतन्त्रस्य नूतनं संस्करणम् प्रकाशितवान्। तच्च 'पञ्चाख्यानकम्' इति नाम्ना परिचीयते। इतः पूर्वमपि 'तन्त्राख्यायिका' इति नाम्ना अस्य कथाग्रन्थस्य किंचन प्राचीनम् संस्करणम् प्रचलितम् आसीत्। अन्यानि अपि २५० संस्करणानि प्रायेण समग्रे भूमण्डले प्रचलितामि आसन्।

पञ्चतन्त्रस्य कथायाः प्रारम्भे एव महिलारोप्य नगरस्य उल्लेखः दृश्यते। महिलारोप्यम् भवति दाक्षिणात्यस्य अन्तर्गतम्। तस्मात् केचन एवम् अनुमानम् कुर्वन्ति यत्, पञ्चतन्त्रस्य रचयिता विष्णुशर्मा आसीत् दाक्षिणात्यनिवासी। पञ्चतन्त्रस्य प्रथमतः अनुवादः अभवत् पह्लवीभाषायाम्, ख्रीष्टीयषष्ठदशकस्य चतुर्थे दशके। किञ्च अस्मिन् ग्रन्थे अर्थशास्त्रस्य सुस्पष्टः प्रभावः दृश्यते। अत्र दीनार-मुद्रायाः उल्लेखः प्राप्यते। तस्मात् अनुमीयते यत्, द्वितीयशतकतः तृतीयशतकस्य मध्यवर्तिनि काले एव अयं ग्रन्थः विरचितः अभवत् इति शम्।